## .. shrii subrahmaNyahRidaya stotraM ..

## ॥ श्री सुब्रह्मण्यहृदय स्तोत्रम् ॥

अस्य श्री सुब्रह्मण्य हृदय स्तोत्रमहामन्त्रस्य, परब्रह्म ऋषिः ।देवी गायत्री छन्दः ।श्रीसुब्रह्मण्यो देवता ।सौः बीजम् ।प्रीं शक्तिः ।श्रीसुब्रह्मण्येश्वरः कीलकं ।श्री सुब्रह्मण्येश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

॥ कर न्यासः ॥

ॐ सुब्रह्मण्याय अंगुष्टाभ्यां नमः ।
शण्मुखाय तर्जनीभ्यां नमः ।
शक्तिधराय मध्यमाभ्यां नमः ।
षड्त्रिंशत्कोणाय अनामिकाभ्यां नमः ।
सर्वतोमुखाय कनिष्ठिकाभ्यां नमः ।
तारकान्तकाय करतल करपृष्ठाभ्यां नमः ॥

॥ हृदयादि न्यासः ॥

ॐ सुब्रह्मण्याय हृदयाय नमः ।
शण्मुखाय शिरसे स्वाहा ।
शक्तिधराय शिकायै वषट् ।
षड्त्रिंशत्कोणाय कवचाय हुम् ।
सर्वतोमुखाय अस्त्राय फट् ।
तारकान्तकाय भूर्भुवःसुवरोमिति दिग्बन्धः ॥

॥ ध्यानम् ॥

हृत्पद्मकर्णिकामध्ये ध्यायेत्सर्वमनोहरम् ।
सुवर्णमण्टपंदिव्यं रत्नतोरणराजितम् ॥ १॥
रत्नस्तंभ सहस्रैश्च शोभितं परमात्भुतम् ।
सेवार्थमागतै सिद्धै साध्यैरध्युषितंसदा ॥ २॥
महायोगीन्द्र संसेव्यं मन्दारतरुमण्डितम् ।
माणिक्य विद्रुमैश्चैव महा श्रीभिरुञ्चितम् ॥ ४॥
तन्मध्येनन्तरत्नश्री जटामकुट शोभितम् ।

रत्नसिंहासनं दिव्यं रविकोटिसमप्रभम् ॥ ५ ॥
सर्वाश्चर्यामयं पुण्यं सर्वरत्न परिष्कृतम् ।
तन्मध्येष्टदळंपद्मं उद्यत्सूर्या प्रभोदरम् ॥ ६ ॥
निगामागमरोलंबं लंबकं चित्स्वरूपिणिम् ।
विद्या ज्योतिर्मयं दिव्यं देवताभिर्नमस्कृतम् ॥ ७ ॥
देदीप्यमाना रुचिभिर्विशाखं सुमनोहरम् ।
तन्मध्ये सर्वलोकेशं ध्यायेत्सर्वाङ्गसुन्दरम् ॥ ८ ॥
अनन्तादित्यसङ्काश माश्रिताभीष्टदायकम् ।
अचिन्त्यज्ञानविज्ञानतेजोबलसमार्जितम् ॥ ९ ॥
सर्वायुध धरं वीरं सर्वाश्चर्यामयं गुहम् ।
महर्हरत्नखचितं षड्किरीटविराजितम् ॥ १० ॥
शशाङ्गार्ध कलारम्य समुद्यन्मौलिभूषणम् ।
सम्पूर्ण चन्द्रसाहस्र समुद्यद्वदनोज्वलम् ॥ ११ ॥
विशाल फाल ललितं विलोलालक भूषणम् ।
मदनोज्वल कोदण्ड मङ्गळ भ्रू विराजितम् ॥ १२ ॥
विस्तीर्णरूपतेजसं विलसत्द्वादशेक्षणम् ।
चारुश्रीवर्ण सम्पूर्ण कर्णशोभाभिभासुरम् ॥ १३ ॥
मणि प्रभा मयूर श्री स्फुरन्मकरकुण्डलम् ।
लसत् दर्पण दर्पघ्न गण्डस्थल विराजितम् ॥ १४ ॥
नव्यकाञ्चन पुष्पश्री नासा पुटविराजितम् ।
मन्दहास प्रभाजाल मधुराधर शोभितम् ॥ १५ ॥
सर्वलक्षण लक्ष्मीश कंबुसुन्दर कन्धरम् ।
महनीय महारत्न दिव्यहार विराजितम् ॥ १६ ॥
उदग्रनाग केयूर सन्नद्धशुभकुण्डलम् ।
रत्नकङ्कण संशोभि कराग्र श्रीमहोज्वलम् ॥ १७ ॥
महामाणिक्य पर्यङ्क वक्षस्थल विराजितम् ।
समस्त जगदाधारं स्वर्णवर्णशुभोदरम् ॥ १८ ॥
अतिगांभीर्य संभाव्य नाभीनव सरोरुहम् ।
रत्नशृ ंखलिका बन्धलसन्मध्यप्रदेशिकम् ॥ १९ ॥
कनत् कनक संवीत पीताम्बरसमावृतम् ।
शृङ्गाररस सम्पूर्ण रत्नस्तम्भोपमोरुकम् ॥ २० ॥
रत्नमञ्जीर सन्नद्ध मणिदीप पदाम्बुजम् ।
भक्ताभीष्टप्रदं देवं ब्रह्मविष्ण्वादिसंस्तुतम् ॥ २१ ॥
कटकाक्षवीक्षणैः स्निग्धस्तोषयत्त्वंजगत्पतिम् ।
सदानन्दं ज्ञानमूर्तिं सर्वलोकप्रियङ्करम् ॥ २२ ॥
शङ्करं सात्मजं देवं ध्यायेत् शरवणोत्भवम् ।

अनतादिव्यचन्द्राग्नि तेजसंपूर्णविग्रहम् ॥ २३ ॥
सर्वलोकवनरतं सर्वतत्वाद्य तत्वगम् ।
सर्वेश्वरं सर्वविभुं सर्वभूतहितेरतम् ॥ २४ ॥
एवंजपित्वा हृदयं शण्मुखस्यमहात्मनः ।
सर्वान् कामानवाप्नोति सम्यज्ञानङ्चविन्दति ॥ २५ ॥
षुचौ देवशे समासीनः शुद्धात्मा च कृताह्निकः ।
प्राङ्मुखौ यतचित्तश्च जपेधृदयमुत्तमम् ॥ २६ ॥
सकृदेततन्मनन्जप्त्वा संप्राप्नोत्यखिलं शुभम् ।
सर्वाघहरणं मृत्युदारिद्रस्यचनाशनम् ॥ २७ ॥
सर्व सम्पत्करंपुण्यं सर्वरोग निवारणम् ।
सर्व शर्म करं दिव्यं सर्वाभीष्टार्थदायकम् ॥ २८ ॥
सर्वकामप्रदं गुह्यं अपवर्गैक कारणम् ।
प्रजाकरं राज्यकरं भाग्यदं बहुपुण्यदम् ॥ २९ ॥
गुह्यात् गुह्यतरं भूयो देवानामपि दुर्लभा ।
इदन्तुनातपस्काय नाभक्ताय कदाचन ॥ ३० ॥
नचा शूश्रूषवेदेयं मदान्धायनकर्हिचित्
सच्चिष्याय सुशीलाय स्कन्दभक्तिरतायच
सर्वदाभिरतायेदं दातव्यं जयवर्धनम् ॥ ३१ ॥
॥ इति श्री सुब्रह्मण्यहृदयस्तोत्रं सम्पूर्णम् ॥

---

Encoded and proofread by antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated March 16, 2006